Downloaded From :http://cbseportal.com/

SET – 4

**Series : GBM/1**

कोड नं.
Code No. **49/1**

रोल नं.
Roll No.

परीक्षार्थी कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें ।
Candidates must write the Code on the title page of the answer-book.

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **12** हैं ।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए कोड नम्बर को छात्र उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें ।
- कृपया जाँच कर लें कि इस प्रश्न-पत्र में **12** प्रश्न हैं ।
- **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें ।**
- इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है । प्रश्न-पत्र का वितरण पूर्वाह्ण में 10.15 बजे किया जायेगा । 10.15 बजे से 10.30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे ।
- Please check that this question paper contains **12** printed pages.
- Code number given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.
- Please check that this question paper contains **12** questions.
- **Please write down the Serial Number of the question before attempting it.**
- 15 minute time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the students will read the question paper only and will not write any answer on the answer-book during this period.

# संस्कृतम् (ऐच्छिकम्)

## SANSKRIT (Elective)

*अवधि : होरात्रयम्* | *पूर्णाङ्का : **100***

*निर्धारित समय : **3** घंटे* | *अधिकतम अंक : **100***

*Time allowed : **3** hours* | *Maximum Marks : **100***



Downloaded From :http://cbseportal.com/ Courtesy : CBSE

Downloaded From :http://cbseportal.com/

CBSE PORTAL www.cbseportal.com

| | |
|---|---|
| **निर्देशाः :** | *संकेताभावे सर्वेषां प्रश्नानामुत्तराणि, संस्कृतेनैव लेखनीयानि ।* |
| **निर्देश :** | *जहाँ संकेत न हो, वहाँ सभी प्रश्नों के उत्तर संस्कृत में ही लिखें ।* |
| **Instructions :** | *Answer all questions in Sanskrit, unless instructions are given otherwise.* |

अस्मिन् प्रश्नपत्रे **चत्वारः** खण्डाः सन्ति ।

इस प्रश्न-पत्र में **चार** खण्ड हैं ।

*There are **four** sections in this question paper.*

| | | | |
|---|---|---|---|
| खण्डः क | : | अपठितांश – अवबोधनम् (अपठितांश – अवबोधन ) | **15 अङ्काः** |
| Section A | : | Unseen Reading Comprehension | |
| खण्डः ख | : | संस्कृतेन रचनात्मकलेखनम् (संस्कृत में रचनात्मक लेखन) | **15 अङ्काः** |
| Section B | : | Writing Skills in Sanskrit | |
| खण्डः ग | : | पठितांश – अवबोधनं संस्कृतसाहित्यस्य परिचयः च (पठितांश – अवबोधन एवं संस्कृत साहित्य परिचय) | **40 + 10 = 50 अङ्काः** |
| Section C | : | Reading Comprehension & Introduction to History of Sanskrit Literature | |
| खण्डः घ | : | छन्दोऽलङ्काराः (छन्द एवम् अलङ्कार) | **10 + 10 = 20 अङ्काः** |
| Section D | : | Metres and Figures of Speech | |



Downloaded From :http://cbseportal.com/ Courtesy : CBSE

Downloaded From :http://cbseportal.com/

CBSE PORTAL www.cbseportal.com

**खण्ड: क (Section A)** **15 अङ्का:**

**अपठितांश – अवबोधनम्**

**अपठितांश – अवबोधन**

**Unseen Reading Comprehension**

1. अधोलिखितम् अनुच्छेद**द्वयं** पठित्वा प्रदत्तान् प्रश्नान् संस्कृतेन उत्तरत ।

निम्नलिखित **दोनों** अनुच्छेदों को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में दीजिए ।

Read the following **two** passages and answer the given questions in Sanskrit.

**(क) प्रथम: अनुच्छेद:**

सुखं च दु:खं च मानवजीवनस्य अवस्था द्विविधा भवति । कोऽपि मनुष्य: स्वजीवने दु:खं नेच्छति । दु:खेभ्य: आर्ता: जना: इतस्तत: भ्रमन्ति । स्वामी विवेकानन्द: कथयति – दु:खान् दूरीकर्तुम् उपाया: तु सर्वदा अस्माकं समक्षे विद्यन्ते परं वयम् अज्ञानतावशात् तान् उपायान् न पश्याम: । जीवनस्य समस्यासु पतिता मनुष्या: ईश्वराय दोषं यच्छन्ति । ते एवम् अपि कथयन्ति यत् अस्माकं भाग्यं रुष्टं अस्ति । शान्तमनसा यदि चिन्तनं क्रियते तदा ज्ञायते यत् विपत्ते: समाधानं तु समक्षमेव अस्ति । मनुष्य: स्वसमाधानशक्तिं दृष्ट्वा सुखी भवितुं शक्नोति ।

**प्रश्ना:**

(अ) एकपदेन उत्तरत । **½ × 2 = 1**

एक शब्द में उत्तर दीजिए ।

Answer in one word.

(i) मनुष्य: स्वजीवने किं नेच्छति ?

(ii) मनुष्या: कस्मै दोषं यच्छन्ति ?

(ब) पूर्णवाक्येन उत्तरत । **2**

पूर्ण वाक्य में उत्तर दीजिए ।

Answer in a complete sentence.

स्वामी विवेकानन्द: किं कथयति ?

(स) यथानिर्देशम् उत्तरत । **½ × 4 = 2**

यथानिर्देश उत्तर दीजिए ।

Answer as directed.

(i) ‘भ्रमन्ति’ इति क्रियापदस्य कर्तृपदं किम् ?

(ii) ‘युष्माकम्’ इति पदस्य किं विलोमपदम् अत्र प्रयुक्तम् ?

(iii) ‘ते’ इति सर्वनामपदं कस्मै प्रयुक्तम् ?

(iv) ‘आर्ता:’ इति विशेषणस्य विशेष्यं किम् ?



Downloaded From :http://cbseportal.com/ Courtesy : CBSE

Downloaded From :http://cbseportal.com/

(ख) **द्वितीय: अनुच्छेद:**

भारतं शान्तिप्रिय: देश: अस्ति । परं भारतस्य प्रतिवेशी भारतं शान्तं न द्रष्टुमिच्छति अत: आतंकवादिन: प्रेषयित्वा भारतम् अशान्तं कर्तुं संलग्न: भवति । भारतं सदा आतंकवादस्य विरोधं करोति । भारतस्य प्रतिवेशी भारतं भीरु मत्वा निरन्तरम् आतंकाभिघातं करोति । आतंकवादविषये गम्भीरतां प्रदर्श्य भारतस्य प्रधानमन्त्रिणा प्रत्युत्तरार्थम् आदेश: दत्त: । भारतस्य सज्जै: सैन्यबलै: उत्साहेन प्रतिवेशिन: सीमायां प्रविश्य शल्यात्मक: अभिघात: कृत: । अस्मिन् अभिघाते आततायिनाम् अनेकानि शिबिराणि नष्टानि जातानि । भारतस्य प्रतिवेशिन: हृदये अपि भयस्य संचार: अभवत् ।

**प्रश्ना:**

(अ) एकपदेन उत्तरत । **1 × 2 = 2**

एक शब्द में उत्तर दीजिए ।

Answer in one word.

(i) भारतं कस्य विरोधं करोति ?

(ii) भारतं कीदृश: देश: अस्ति ?

(ब) पूर्णवाक्येन उत्तरत । **2 × 1 = 2**

पूर्ण वाक्य में उत्तर दीजिए ।

Answer in a complete sentence.

भारतस्य प्रधानमन्त्रिणा किं कृतम् ?

(स) यथानिर्देशम् उत्तरत । **1 × 4 = 4**

यथानिर्देश उत्तर दीजिए ।

Answer as directed.

(i) 'भवति' इति क्रियापदस्य कर्तृपदं किम् ?

(ii) 'समर्थनम्' इति पदस्य विलोमपदं किम् ?

(iii) 'सैन्यवासा:' इति पदस्य किं समानार्थकम् अत्र प्रयुक्तम् ?

(iv) 'सज्जै:' इति विशेषणस्य विशेष्यं किम् ?

(द) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं **संस्कृतेन** लिखत । **2**

इस अनुच्छेद के लिए उपयुक्त शीर्षक **संस्कृत** में लिखिए ।

Write a suitable title for this passage in **Sanskrit**.



Downloaded From :http://cbseportal.com/ Courtesy : CBSE

Downloaded From :http://cbseportal.com/

CBSE PORTAL www.cbseportal.com

## खण्ड: ख (Section B) 15 अङ्का:

### संस्कृतेन रचनात्मकलेखनम्
### संस्कृत में रचनात्मक लेखन
### Writing Skills in Sanskrit

2. मञ्जूषात: उचितसङ्केतान् गृहीत्वा अधोलिखितां कथां पूरयित्वा पुन: लिखत । $1 \times 10 = 10$

मञ्जूषा से उचित संङ्केत लेकर निम्नलिखित कथा को पूरा करके पुन: लिखिए ।

Complete and rewrite the following story, with the help of the words given in the box below.

**कथा :**

कस्मिंश्चिद् ग्रामे एक: कृषक: सदैव ______ (i) तण्डुलान् वपति स्म । प्रतिवर्षं स: प्रतियोगितायां उत्कृष्टतण्डुलोत्पादकस्य ______ (ii) प्राप्नोति स्म । एकदा एक: पत्रकार: एतस्य ______ (iii) ज्ञातुं तस्य पार्श्वे अगच्छत् । तस्मिन् दिवसे अनेके ______ (iv) बीजानि नेतुं तस्य कृषकस्य पार्श्वे आगच्छन् । स: सर्वेभ्य: ______ (v) अयच्छत् । एतद् दृष्ट्वा पत्रकार: आश्चर्यचकित: अभवत् । आश्चर्यचकितं पत्रकारं दृष्ट्वा स: कृषक: अवदत्-एते कृषका: मम ______ (vi) सन्ति । सर्वेषु विशिष्टा: गुणा: सन्ति । यथा अहं उत्तमबीजविशेषज्ञ: अस्मि तथैव एषु एक: पर्यावरणविद् अन्य: च ______ (vii) । अहम् एतेभ्य: बीजानि ______ (viii) । एते स्वानुभवान् मह्यम् कथयन्ति । पुरस्कारं प्राप्य वयं मिलित्वा ______ (ix) कुर्म: । एवम् अस्मासु परस्परं ______ (x) उत्पन्ना न भवति ।

**मञ्जूषा**

| |
|---|
| द्वेषभावना, स्वक्षेत्रे, रहस्यम्, बीजानि, मित्राणि, ददामि, उत्सवम्, पुरस्कारम्, कृषका:, उर्वरकविशेषज्ञ: । |

3. मञ्जूषात: पदानि चित्वा 'दीपावली' इति विषयम् अधिकृत्य **पञ्च** वाक्यानि संस्कृतेन लिखत । $1 \times 5 = 5$

मञ्जूषा से पद चुनकर 'दीपावली' विषय पर संस्कृत में **पाँच** वाक्य लिखिए ।

Write **five** sentences in Sanskrit on 'Deepawali' with the help of the words given in the box below.

**मञ्जूषा**

| |
|---|
| उत्सव:, मिलित्वा, भारतवर्षे, श्रीराम:, मन्यन्ते, सत्यस्य, वस्त्राणि, पवित्र:, दृश्यते, दूरम्, धारयन्ति, रावणम्, प्रकाश:, अयोध्याम्, विजय:, अधर्मस्य, मिष्टान्नानि, वितरन्ति । |



Downloaded From :http://cbseportal.com/ Courtesy : CBSE

Downloaded From :http://cbseportal.com/

**खण्ड : ग (Section C)** **40 + 10 = 50 अङ्का:**

**पठितांश – अवबोधनं संस्कृतसाहित्यस्य परिचय: च**

**पठितांश – अवबोधन एवं संस्कृत साहित्य परिचय**

**Reading Comprehension & Introduction to History of Sanskrit Literature**

4. अधोलिखितं गद्यांशं, पद्यं, नाट्यांशं च पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत ।

निम्नलिखित गद्यांश, पद्य तथा नाट्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में दीजिए ।

Read the following prose, poetry and drama passages and answer the given questions in Sanskrit.

**(क) गद्यांश :**

"एवं समतिक्रामत्सु दिवसेषु राजा चन्द्रापीडस्य यौवराज्याभिषेकं चिकीर्षु: प्रतीहारान् उपकरण-सम्भारसंग्रहार्थमादिदेश । समुपस्थितयौवराज्याभिषेकं च तं कदाचिद् दर्शनार्थमागतम् आरूढविनयमपि विनीततरमिच्छन् कर्तुं शुकनास: सविस्तरमुवाच – तात ! चन्द्रापीड ! विदित-वेदितव्यस्याधीत-सर्वशास्त्रस्य ते नाल्पमप्युपदेष्टव्यमस्ति । केवलं च निसर्गत एवातिगहनं तमो यौवनप्रभवम् । अपरिणामोपशमो दारुणो लक्ष्मीमद: ।"

**प्रश्ना:**

(अ) एकपदेन उत्तरत । **½ × 2 = 1**

एक शब्द में उत्तर दीजिए ।

Answer in one word.

(i) राजा कस्य यौवराज्याभिषेकं कर्तुमिच्छति स्म ?

(ii) क: चन्द्रापीडम् उपदेशम् अयच्छत् ?

(ब) पूर्णवाक्येन उत्तरत । **2**

पूर्ण वाक्य में उत्तर दीजिए ।

Answer in a complete sentence.

यौवनप्रभवं तम: कीदृशं भवति ?

(स) यथानिर्देशम् उत्तरत । **1 × 2 = 2**

यथानिर्देश उत्तर दीजिए ।

Answer as directed.

(i) 'दारुण:' इति विशेषणपदस्य विशेष्यपदं किम् ?

(ii) 'आदिदेश' इति क्रियापदस्य कर्तृपदं किम् ?



Downloaded From :http://cbseportal.com/ Courtesy : CBSE

Downloaded From :http://cbseportal.com/

(ख) **पद्यम्** :

"स्वायत्तमेकान्तगुणं विधात्रा विनिर्मितं छादनमज्ञतायाः ।

विशेषतः सर्वविदां समाजे विभूषणं मौनमपण्डितानाम् ।।"

**प्रश्नाः**

(अ) एकपदेन उत्तरत । **½ × 2 = 1**

एक शब्द में उत्तर दीजिए ।

Answer in one word.

(i) स्वायत्तमेकान्तगुणं केन विनिर्मितम् ?

(ii) अज्ञतायाः छादनं किमस्ति ?

(ब) पूर्णवाक्येन उत्तरत । **2**

पूर्ण वाक्य में उत्तर दीजिए ।

Answer in a complete sentence.

मौनं कुत्र विभूषणं भवति ?

(स) यथानिर्देशम् उत्तरत । **1 × 2 = 2**

यथानिर्देश उत्तर दीजिए ।

Answer as directed.

(i) 'मूर्खतायाः' अस्य किं पर्यायपदम् ?

(ii) 'दोषम्' अस्य विलोमपदं किम् ?

(ग) **नाट्यांशः**

"अरुन्धती : एहि वत्स ! (लवमुत्सङ्गे गृहीत्वा आत्मगतम्) दिष्ट्या न केवलमुत्सङ्गश्चिरान्मनोरथोऽपि मे पूरितः ।

कौसल्या : जात ! इतोऽपि तावदेहि । (उत्सङ्गे गृहीत्वा) अहो, न केवलं मांसलोज्ज्वलेन देहबन्धेन, कलहंसघोष-घर्घरानुनादिना स्वरेण च रामभद्रमनुसरति । जात ! पश्यामि ते मुखपुण्डरीकम् ।

(चिबुकमुन्नमय्य, निरूप्य, सबाष्पाकूतम्) राजर्षे ! किं न पश्यसि ? निपुणं निरूप्यमाणो वत्साया मे वध्वा मुखचन्द्रेणापि संवदत्येव ।"

**प्रश्नाः**

(अ) एकपदेन उत्तरत । **½ × 2 = 1**

एक शब्द में उत्तर दीजिए ।

Answer in one word.

(i) 'गच्छ' अस्य विलोमपदं किम् ?

(ii) 'सौभाग्येन' अस्य पर्यायपदं किम् ?



Downloaded From :http://cbseportal.com/ Courtesy : CBSE

Downloaded From :http://cbseportal.com/

(ब) पूर्णवाक्येन उत्तरत । **2**

पूर्ण वाक्य में उत्तर दीजिए ।

Answer in a complete sentence.

लव: कथं रामभद्रमनुसरति ?

(स) यथानिर्देशम् उत्तरत । **1 × 2 = 2**

यथानिर्देश उत्तर दीजिए ।

Answer as directed.

(i) 'ध्वनिना' अस्य पर्यायपदं किम् ?

(ii) 'ते' इति सर्वनामपदं कस्मै प्रयुक्तम् ?

5. शब्दार्थान् मेलयित्वा लिखत । **½ × 4 = 2**

शब्दों का अर्थों से मिलान करके लिखिए ।

Match the words with their meanings and rewrite the same.

| | **शब्दा:** | | **अर्था:** |
|---|---|---|---|
| (अ) | घोरा | (i) | आगमनेन |
| (ब) | अर्थिनाम् | (ii) | समीपे |
| (स) | अभिगमनेन | (iii) | भयंकरी |
| (द) | पार्श्वे | (iv) | याचकानाम् |

6. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत । **1 × 4 = 4**

रेखाङ्कित पदों के आधार पर प्रश्न-निर्माण कीजिए ।

Frame questions on the basis of the underlined words.

(i) <u>अस्माभि:</u> पर्वता: शंकव: कृता: ।

(ii) पृथिव्या: <u>सप्त</u>भेदा: सन्ति ।

(iii) वर्तमानकाले <u>समाजस्य</u> भीषणपरिस्थिति: अस्ति ।

(iv) ब्राह्मणसमूह: <u>दक्षिणया</u> तोषित: ।



Downloaded From :http://cbseportal.com/ Courtesy : CBSE

Downloaded From :http://cbseportal.com/

7. अधोलिखितभावार्थयो: रिक्तस्थानपूर्तिं मञ्जूषापदसहायतया कृत्वा लिखत । **½ × 12 = 6**

निम्नलिखित **दोनों** भावार्थों में मञ्जूषा में दिए गए शब्दों की सहायता से रिक्त स्थानों की पूर्ति करके लिखिए ।

Fill in the blanks in the following **two** explanations with the help of the words given in the box and rewrite the same.

(अ) "ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् ।
तेन त्यक्तेन भुञ्जीथा मा गृध: कस्यस्विद्धनम् ।।"

**भावार्थ:**

यत् किञ्चिदपि अस्मिन् ______ (i) अस्ति तत् सर्वम् ______ (ii) व्याप्तमस्ति । अस्मिन् संसारे सर्वे ______ (iii) त्यागभावेन ______ (iv) । मनुष्यै: ______ (v) धनस्य लोभ: न ______ (vi) ।

(ब) "यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जन: ।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ।।"

**भावार्थ:**

गीतायां ______ (i) उक्तं यत् सज्जनानां ______ (ii) लोकस्य कृते प्रमाणम्: भवति । सज्जना: यादृशं व्यवहारं ______ (iii) अन्ये जना: तम् अनुचरन्ति । ______ (iv) यस्मिन्नपि विषये यत्किञ्चिदपि ______ (v) यच्छन्ति सर्वे जना: तं ______ (vi) स्वीकुर्वन्ति ।

**मञ्जूषा**

| |
|---|
| ईश्वरेण, भोक्तव्या:, भोगा:, कस्यापि, श्रीकृष्णेन, सज्जन:, जगति, प्रमाणरूपेण, निर्णयम्, कुर्वन्ति, व्यवहार:, करणीय: । |

8. अधोलिखितयो: श्लोकयो: अन्वयद्वये रिक्तस्थानपूर्तिं कुरुत । **1.5 + 1.5 = 3**

निम्नलिखित **दोनों** श्लोकों के अन्वयों में रिक्त स्थानों की पूर्ति कीजिए ।

Fill in the blanks in the following prose-order-renderings of the **two** verses.

(अ) "तवार्हतो नाभिगमेन तृप्तं
मनो नियोगक्रिययोत्सुकं मे ।
अप्याज्ञया शासितुरात्मना वा
प्राप्तोऽसि सम्भावयितुं वनान्माम् ।।"

**अन्वय:**

अर्हतो तव ______ (i) नियोगक्रियया उत्सुकं मे मन: न तृप्तम् । अपि शासितु: ______ (ii) वा आत्मना मां ______ (iii) वनात् प्राप्त: असि ।

(ब) "सर्वत्र नो वार्तमवेहि राजन् !
नाथे कुतस्त्वय्यशुभं प्रजानाम् ।
सूर्ये तपत्यावरणाय दृष्टे:
कल्पेत लोकस्य कथं तमिस्रा ।।"



Downloaded From :http://cbseportal.com/ Courtesy : CBSE

Downloaded From :http://cbseportal.com/

**अन्वय:**

राजन् ! सर्वत्र नो वार्तम् अवेहि । त्वयि ________ (i) प्रजानां कुत: अशुभम् । सूर्ये तपति ________ (ii) दृष्टे: आवरणाय ________ (iii) कथं कल्पेत ।

9. यथानिर्देशम् उत्तरत ।
यथानिर्देश उत्तर दीजिए ।
Answer as directed.

(अ) कर्तृपदं क्रियापदं च चिनुत । **½ × 4 = 2**
कर्ता एवं क्रियापद चुनिए ।
Select the subject and the verb.
(i) एष: लोचने शीतलयति ।
(ii) तं विनीततरमिच्छन् कर्तुं शुकनास उवाच ।

(ब) विशेषणपदं चिनुत । **1 × 2 = 2**
विशेषण पद चुनिए ।
Select the adjective.
(i) प्राज्ञ: खलु कुमार: ।
(ii) निसर्गत एव अतिगहनं तमो यौवनप्रभवम् ।

(स) अधोलिखितपङ्क्त्यो: रेखांकितसर्वनामपदे काभ्यां प्रयुक्ते ? **1 × 2 = 2**
निम्नलिखित पंक्तियों में रेखांकित-सर्वनाम पद किनके लिए प्रयुक्त हैं ?
In the following lines for whom the underlined pronouns are used ?
(i) सकलगुणनिवास: स राजा मनस्यचिन्तयत् ।
(ii) स: प्रतिमासं प्रथमदिवसे वेतनस्य अर्धाधिकं भागं केरलं प्रेषयति स्म ।

(द) अधोलिखितङ्क्तिभ्याम् 'अश्व:' तथा 'अग्नि:' इति पदयो: समानार्थके पदे चित्वा लिखत । **1 × 2 = 2**
निम्नलिखित पंक्तियों में से 'अश्व' तथा 'अग्नि' इन पदों के समानार्थक पद चुनकर लिखिए ।
Select and write the synonyms of the words 'अश्व' and 'अग्नि' from the following lines.
(i) अस्मिन् समये एक: गौरो युवा हयेन पर्वतश्रेण्युपर्युपरि गच्छति स्म ।
(ii) उत्साहस्य ज्वाला या पूर्वं प्रचण्डतमा आसीत् ।

(य) क: कं कथयति ? **½ × 4 = 2**
कौन किसको कह रहा है ?
Who is saying this to whom ?
(i) 'भो राजन्, एतत्सिंहासने तेनैव अध्यासितव्यं यस्य विक्रमतुल्यम् औदार्यमस्ति ।'
(ii) 'भवादृशा एव भवन्ति भाजनान्युपदेशानाम् ।'



Downloaded From :http://cbseportal.com/ Courtesy : CBSE

Downloaded From :http://cbseportal.com/
CBSE PORTAL www.cbseportal.com

10. (अ) अधोलिखितलेखकानां कस्यापि **एकस्य** काव्यस्य नाम लिखत । 1 × 5 = 5

निम्नलिखित लेखकों के किसी **एक** काव्य का नाम लिखिए ।

Write the name of any **one** work of each of the following poets.

कालिदास:, बाणभट्ट:, मथुरानाथ शास्त्री, जगन्नाथ:, माघ: ।

(ब) अधोलिखितरचनानां लेखकानां नामानि लिखत । 1 × 5 = 5

निम्नलिखित रचनाओं के लेखकों के नाम लिखिए ।

Write the names of the authors of the following works.

उत्तररामचरितम्, महाभारतम्, समुद्र-संगम:, पाषाणी-कन्या, नीतिशतकम् ।

## खण्ड: घ (Section D) 10 + 10 = 20 अङ्का:

### छन्दोऽलङ्कारा:

### छन्द एवम् अलङ्कार

### Metres and Figures of Speech

11. (अ) प्रश्नान् उत्तरत । 1 × 2 = 2

प्रश्नों के उत्तर दीजिए ।

Answer the questions.

(i) 'विद्यायाम्' अत्र को गण: ?

(ii) 'नाथे' अत्र 'थे' इति लघु: गुरु: वा ?

(ब) अधोलिखितपरिभाषा: पूरयत । 1 × 4 = 4

निम्नलिखित परिभाषाओं को पूरा कीजिए ।

Complete the following definitions.

(i) 'उक्ता वसन्ततिलका ________ ।'

(ii) 'सूर्याश्वैर्यदि म: ________ शार्दूलविक्रीडितम् ।'

(iii) 'ननम ________ मालिनी भोगिलोकै: ।'

(iv) 'जतौ तु वंशस्थमुदीरितं ________ ।'

(स) अधोलिखितयो: **एकस्य** छन्दस: उदाहरणं लिखत । 2

निम्नलिखित में से किसी **एक** छन्द का उदाहरण लिखिए ।

Write an example of any **one** of the following metres.

अनुष्टुप्, मन्दाक्रान्ता ।

(द) अधोलिखितपङ्क्त्यो: किं किं छन्द: ? 1 × 2 = 2

निम्नलिखित पंक्तियों में कौन-कौन सा छन्द है ?

What is the metre in the following lines ?

(i) 'स्वायत्तमेकान्तगुणं विधात्रा ।'

(ii) 'पश्चात्पुच्छं वहति विपुलं तच्च धूनोत्यजस्रम् ।'



Downloaded From :http://cbseportal.com/ Courtesy : CBSE

Downloaded From :http://cbseportal.com/

12. (अ) अधोलिखितस्य कस्यचि**देकस्य** शब्दालङ्कारस्य सोदाहरणं लक्षणं लिखत । **3**

निम्नलिखित में से किसी **एक** शब्दालङ्कार का सोदाहरण लक्षण लिखिए ।

Write the definition and example of any **one** of the following figures of speech.

यमकम्, अनुप्रास: ।

(ब) कस्यचि**देकस्य** अर्थालङ्कारस्य लक्षणमुदाहरणं च लिखत । **3**

किसी **एक** अर्थालङ्कार का लक्षण एवं उदाहरण लिखिए ।

Define and illustrate any **one** of the figures of speech.

अर्थान्तरन्यास:, उत्प्रेक्षा ।

(स) अधोलिखितपङ्क्त्यो: अलङ्कारं निर्दिशत । **$1 \times 2 = 2$**

निम्नलिखित पंक्तियों में अलङ्कार का निर्देश कीजिए ।

Indicate the figures of speech in the following lines.

(i) 'रमते न मरालस्य मानसं मानसं विना ।'

(ii) 'मम जीवनप्रदीपो निर्वापितो भवितुमिच्छति ।'

(द) अधोलिखितपरिभाषा**द्वयं** पूरयत । **$1 \times 2 = 2$**

निम्नलिखित **दोनों** परिभाषाओं को पूर्ण कीजिए ।

Complete the following definitions of the **two** figures of speech.

(i) 'तद्रूपकमभेदो य ........... ।'

(ii) 'संभावनामथोत्प्रेक्षा ........... परात्मना ।'



Downloaded From :http://cbseportal.com/ Courtesy : CBSE